# ॥ વીરકકૃતા પાર્વતીસ્તુતિઃ ॥

.. vIrakakRRitA pArvatIstutiH ..

sanskritdocuments.org

August 20, 2017

# .. vIrakakRRitA pArvatIstutiH ..

# ॥ વીરકકૃતા પાર્વતીસ્તુતિઃ ॥

## Sanskrit Document Information

Text title : pArvatIstutiH vIrakakRitA

File name : pArvatIstutivIraka.itx

Category : devii, pArvatI

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Subrahmanyam Yvs yvspmp at gmail.com

Proofread by : Subrahmanyam Yvs, Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : matsyapurANa adhyAya 158 shlokAH 11-20

Latest update : July 21, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ વીરકકૃતા પાર્વતીસ્તુતિઃ ॥

વીરક ઉવાચ ।
નતસુરાસુરમૌલિમિલન્મણિપ્રચયકાન્તિ કરાલ નખાઙ્કિતે ।
નગસુતે! શરણાગતવત્સલે! તવ નતોઽસ્મિ નતાર્તિવિનાશિનિ ॥ ૧॥

તપનમણ્ડલમણ્ડિતકન્ધરે ! પૃથુસુવર્ણસુવર્ણનગદ્યુતે ।
વિષભુજઙ્ગનિષઙ્ગવિભૂષિતે ! ગિરિસુતે ! ભવતીમહમાશ્રયે ॥ ૨॥

જગતિ કઃ પ્રણતાભિમતં દદૌ ઝટિતિ સિદ્ધનુતે ભવતી યથા ।
જગતિ કાં ચ ન વાઞ્છતિ શઙ્કરો ભુવનધૃત્તનયે ! ભવતીં યથા ॥ ૩॥

વિમલયોગ વિનિર્મિત દુર્જય સ્વતનુ તુલ્યમહેશ્વર મણ્ડલે ।
વિદલિતાન્ધક બાન્ધવસંહતિઃ સુરવરૈઃ પ્રથમં ત્વમભિષ્ટુતા ॥ ૪॥

સિતસટાપટલોદ્ધત કન્ધરા ભરમહા મૃગરાજ રથસ્થિતા ।
વિમલશક્તિમુખાનલપિઙ્ગલા યતભુજૌઘ વિપિષ્ટમહાસુરા ॥ ૫॥

નિગદિતા ભુવનૈરિતિ ચણ્ડિકા જનનિ ! શુમ્ભ નિશુમ્ભ નિષૂદની ।
પ્રણત ચિન્તિત દાનવ દાનવ પ્રમથનૈકરતિસ્તરસા ભુવિ ॥ ૬॥

વિયતિ વાયુપથે જ્વલનોજ્જ્વલેઽવનિતલે તવ દેવિ! ચ યદ્વપુઃ ।
તદજિતેઽપ્રતિમે પ્રણમામ્યહં ભુવન ભાવિનિ! તે ભવવલ્લભે ॥ ૭॥

જલધયો લલિતોદ્ધત વીચયો હુતવહદ્યુતયશ્ચ ચરાચરમ્ ।
ફણસહસ્રભૃતશ્ચ ભુજઙ્ગમા સ્ત્વદભિધાસ્યતિ મય્યભયઙ્કરાઃ ॥ ૮॥

ભગવતિ! સ્થિરભક્તજનાશ્રયે! પ્રતિગતો ભવતી ચરણાશ્રયમ્ ।
કરણજાતમિહાસ્તુ મમાચલં નુતિલવાપ્તિફલાશયહેતુતઃ ॥ ૯॥

પ્રશમમેહિ મમાત્મજ વત્સલે ! તવ નમોઽસ્તુ ! જગત્ત્રયસંશ્રયે ! ।
ત્વયિ મમાસ્તુ મતિઃ સતતં શિવે શરણગોઽસ્મિ નતોઽસ્મિ નમોઽસ્તુ તે ॥ ૧૦॥

ઇતિ મત્સ્યપુરાણાન્તર્ગતા વીરકકૃતા પાર્વતીસ્તુતિઃ સમાપ્તા ।

matsyapurANa adhyAya 158 shlokAH 11-20

Transliterated by Subrahmanyam Yvs yvspmp at gmail.com/

Proofread by Subrahmanyam Yvs, Malleswara Rao Yellapragada malleswararaoy at yahoo.com

.. vIrakakRRitA pArvatIstutiH ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*